# संस्कृत–हिन्दीभाषयोः विभक्ति–व्यत्यासः

**प्रीति शुक्ला, देवानन्द शुक्ल, अम्बा कुलकर्णी**
संस्कृताध्ययनविभागः, हैदराबाद–विश्वविद्यालयः
भाग्यनगरम् (हैदराबाद) भारतम्
shukla.preetidev@gmail.com, dev.shukl@gmail.com, apksh@uohyd.ernet.in

**सारांशः** अनुवादपरम्परायां विभिन्नभाषाणां मध्ये व्यत्यासः विभिन्नस्तरेषु दरीदृश्यते। स व्यत्यासः व्याकरणाधारितः भवति उत तस्य अन्यानि कारणान्यपि भवितुमर्हन्ति। संस्कृतम् एवं हिन्दी उभेऽपि भारोपीयपरिवारीये स्तः। संरचनायां एवञ्च शब्दस्तरे संस्कृतभाषातः हिन्दीभाषायां यथावत् बहवः अंशाः आगताः। तथापि तत्र विभक्तिदृष्ट्या व्यत्यासः दृश्यते। अष्टाध्याय्यां पाणिनिना अपवादान् स्वीकृत्य एव उत्सर्गतः कारकाकेषु विभक्तिनिर्धारणं कृतम्। अपवादेषु नूतनकारकस्यारोपः कृतः उत तत्र विशिष्टविभक्तिनिर्धारणं कृतम्। परन्तु एषा प्रक्रिया हिन्दीभाषायां पूर्णतया स्वीकरणीया न भवति। एतान् सप्तविधान् व्यत्यासानाधारीकृत्य शोधपत्रमिदं लिखितमस्माभिः।

## परिचयः

विभिन्नभाषाः व्याकरणाधारीकृत्य सूचनां प्रस्तुतीकरणार्थं विभिन्न–प्रक्रियाः स्वीकुर्वन्ति। येन सामान्यतः अनुवादे तथा च यान्त्रिकानुवादे विशेषतः विभिन्नस्तरेषु भाषायां व्यत्यासाः दृश्यन्ते। डोर (Dorr, 1994) इति नाम्नी विदुषी अनुवाद–व्यत्यासविषयकप्रक्रिया–विषये चर्चां अकरोत्। तां प्रक्रियामाधारीकृत्य भारतीयभाषासु कार्याण्यपि जातानि। यथा आंग्ल–संस्कृत–हिन्दी–यान्त्रिकानुवादः[1], आंग्ल–संस्कृत–यान्त्रिकानुवादः[2], आंग्ल–हिन्दी–यान्त्रिकानुवादः[3].

संस्कृतम् एवं हिन्दी उभेऽपि भारोपीयपरिवारीये स्तः। संरचनायां एवञ्च शब्दस्तरे संस्कृतभाषातः हिन्दीभाषायां यथावत् बहवः अंशाः आगताः। यदा वयं संस्कृत–हिन्दी–मध्ये व्यत्यासं पश्यामः तदा प्रायः डोर इत्यनया प्रतिपादिते यद्व्यत्यासे यथाकथञ्चिदेव दृश्यते अथवा यान्त्रिकसाधनैः मूलस्रोतस्वीकरणे क्लेशं नोत्पादयन्ति। किञ्च संस्कृत–हिन्दीभाषयोः व्यत्यासाः विभक्तिस्तरे विविधरूपेण दृश्यन्ते। संस्कृतम् एवञ्च हिन्दी उभेऽपि श्लिष्टभाषे स्तः परन्तु संस्कृतं संयोगात्मिका भाषा तथा हिन्दी वियोगात्मिका भाषा[4]। संस्कृतभाषायां सुप्तिङौ विभक्तिसंज्ञौ स्तः। सुप्प्रत्ययाः प्रातिपदिकात् भवन्ति, तिङ् धातोः। परन्तु हिन्दीभाषायां प्रातिपदिकेभ्यः ये प्रत्ययाः भवन्ति ते एव विभक्तिसंज्ञकाः। शोधपत्रेऽस्मिन् संस्कृत–हिन्दी–विभक्तिव्यत्यास–विषये चर्चां कुर्मः।

1 English-Sanskrit-Hindi MT by Goyal and Sinha, 2009.
2 English-Sanskrit MT by Mishra and Mishra, 2008.
3 English-Hindi MT by Dave et al., 2002.
4 द्विवेदी, 2006

**व्यत्यासानां वर्गीकरणम्**

विभक्त्या आर्थिकपक्षस्य विवरणार्थं पाणिनिः कारकस्योपयोगं करोति। आर्थिकदृष्ट्या प्रत्येकस्य कारकस्य कृते एका एव विभक्तिः नोपयुज्यते। एतस्य विषये पं. रमानाथशर्मणा (2002) स्वकीये व्याख्याने लिखितम् –

पाणिनिः कारकस्य विभाजनं सैद्धान्तिकदृष्ट्या 'सामान्यः विशेषः एवं शेषः' इत्याधारेण करोति। "पारिभाषिक–आरोपित–कारकनियमाः" इत्याधारेण षट्कारकाणां कृते सामान्यनियमाः सन्ति। विशेषनियमाः तेषाम् अपवादस्वरूपाः सन्ति। येषां सामान्य–विशेषयोरन्तर्भावः न भवति ते शेषनियमाः भवन्ति। सामान्यनियमेतरगुणानामुपयोगदृष्ट्या अपवादाः आवश्यकाः।

( Pāṇini specifies his kāraka categories based upon the principle of sāmānya 'general', viśeṣa 'particular' and śeṣa 'residual'. The six categories are identified by general rules formulated based upon linguistic generalizations. Particular rules form exceptions to them. Usage which cannot be accounted for by the above two rule types is governed by rules relegated to the residual category. It is obvious that these exceptions are necessary to capture the peculiarities of usage falling outside the scope of the general rules.)

पाणिनीयप्रक्रियायां प्रत्येकस्य कारकस्य कृते एका विभक्तिः निर्धारिता। परन्तु तत्र अपवादाः अपि सन्ति यस्य कारणं कारकविभक्त्योः मध्ये निश्चितरूपेण एकैकस्य कारकस्य कृते एकैव विभक्तिः न निर्धारिता। पाणिनिः द्विधा एतस्य निराकरणं करोति। (अ) कारकस्यारोपं कृत्वा (ब) विशेषविभक्तिनिर्धारणं कृत्वा।

यथा "आधारोऽधिकरणम्" (पा० 1.4.45) सूत्रमिदं आधारस्य अधिकरणसंज्ञां करोति। अनन्तरं तस्मिन्नधिकरणे सामान्यसूत्रेण (सप्तम्यधिकरणे च पा० 2.3.36) सप्तमीविभक्तिर्भवति। परन्तु यदि आधारः अधि पूर्वकः शीङ्, स्था, आस् इत्यस्मात् धातोः सम्बद्धः अस्ति चेत् तस्य कर्मसंज्ञा (अधिशीङ्स्थासां कर्म पा० 1.4.46) भवति एवं च "कर्मणि द्वितीया" (पा० 2.3.2) इत्यनेन कर्मणि द्वितीया विभक्तिर्विधीयते। उदाहरणेऽस्मिन् पाणिनिना सप्तमीविभक्तिवारणाय नूतनकारकस्यारोपं कृत्वा आधारे कर्मसंज्ञामारोप्य तत्र द्वितीया विभक्तिः निर्धार्यते। अनेन प्रकारणैव यत्र पारिभाषिकं कारकं न भवति तत्र साक्षात् कारकमारोपयति। यथा "रुच्यर्थानां प्रीयमाणः" (पा० 1.4.33) रुच्यर्थानां धातूनां प्रयोगे यः प्रीयमाणः सः सम्प्रदानसंज्ञकः भवति। अग्रिमचित्रे आर्थिकदृष्ट्या कारक–विभक्ति–सम्बन्धः प्रदर्श्यते सामान्यरूपेण –




1. दिवः कर्म च (साधकतमम, कारके) (पा० 1.4.43)
2. कर्मणि द्वितीया (पा० 2.3.2)
3. दिवस्तदर्थस्य (कर्मणि, षष्ठी शेषे, अनभिहिते) (पा० 2.3.58)
4. अधिशीङ्स्थासां कर्म (आधारः, कारके) (पा० 1.4.46)
5. क्रुधद्रुहेर्ष्यसूयार्थानां यं प्रति कोपः (सम्प्रदानम्, कारके) (पा० 1.4.37)
6. षष्ठी शेषे (पा० 2.3.50)
7. पृथग्विनानानाभिस्तृतीयान्यतरस्याम् (द्वितीया, पञ्चमी) (पा० 2.3.32)

एतादृशं विवरणात्मकं वर्गीकरणं हिन्दीभाषायां नोपयुज्यते। यदि हिन्दीभाषायाम् अष्टाध्यायीसदृशं व्याकरणमभविष्यत् तर्हि व्यत्यासानां निराकरणं सरलं भविष्यति। तादृशव्याकरणाभावात् अपवाददृष्ट्या व्याकरणस्य नियमानाम् एवञ्च पारिभाषिकारोपितकारकाभ्यां नान्तर्भवन्ति तान् नियमानां परीक्षणं कृत्वा संस्कृत–हिन्दीभाषयोः व्यत्यासः प्रदर्शितः। सः व्यत्यासः सप्तप्रकारकः भवति –

## वैकल्पिक–व्यत्यासः (**Optional Divergence**)

संस्कृतभाषायां वैकल्पिकरूपेण विभक्ती द्वे प्राप्येते। परन्तु हिन्दीभाषाया सः विकल्पः न भवति। यथा संस्कृतभाषायां 'बालकः विद्यालयं गच्छति' इत्यत्र सामान्यतया 'विद्यालय' इत्यस्य कर्मसंज्ञा भवति तस्य फलं 'विद्यालय' इत्यत्र द्वितीयाविभक्तिः आगच्छति। परन्तु अत्रैव वैकल्पिकत्वेन "गत्यर्थकर्मणिद्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" (2.3.12) अनेन सूत्रेण कर्मणि चतुर्थी विभक्तिरपि विधीयते। तस्य फलं 'विद्यालय' इत्यत्र चतुर्थी विभक्तिर्भवति। 'बालकः विद्यालयाय गच्छति' इति रूपं

भवति। अपरत्र हिन्दीभाषायां कर्मत्वेन द्वितीयाविभक्तिरेव भवति (बालक विद्यालय जाता है।) न तु चतुर्थी विभक्तिः।

**आपवादिक–व्यत्यासः (Exceptional Divergence)**

संस्कृतभाषायां केचन अपवादनियमाः सन्ति ये उत्सर्गविभक्तिं प्रबाध्य इतरविभक्तिनिर्धारणं कुर्वन्ति परन्तु हिन्दीभाषायां स अपवादनियमः न प्रवर्तते। उत्सर्गनियमेन एव विभक्तिनिर्धारणं भवति। यथा शकुनिः शतस्य दीव्यति। अत्र "दिवस्तदर्थस्य" (पा० 2.3.58) अनेन सूत्रेण षष्ठीविभक्तिर्विधीयते। परन्तु हिन्दीभाषायां द्वितीयाविभक्तिरेव भवति (शकुनि सौ रुपये जीतता है।)।

**भेदज–व्यत्यासः (Differential Divergence)**

संस्कृतभाषायां भिन्ना विभक्तिः भवति एवञ्च हिन्दीभाषायां भिन्ना विभक्तिः। यथा संस्कृतभाषायां यं प्रति द्रोहः वर्तते तत्र द्रुह धातु योगे संप्रदानसंज्ञा (क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः पा० 1.4.37) एवं चतुर्थीविभक्तिर्भवति (दुर्जनाः सज्जनाय द्रुह्यन्ति)। परन्तु हिन्दीभाषायां तत्र सहार्थत्वात् तृतीयाविभक्तिर्भवति (दुर्जन सज्जनों से द्रोह करते हैं।)

**अन्यतर–व्यत्यासः (Alternative Divergence)**

संस्कृतभाषायां बहुविभक्तयः प्राप्ताः परन्तु हिन्दीभाषा ततः एकामेव विभक्तिं स्वीकरोति। यथा 'आयुक्त' इति शब्दयोगे संस्कृतभाषायां षष्ठी एवञ्च सप्तमी विभक्तिर्भवति (आयुक्तः हरिपूजने/हरिपूजनस्य)। परन्तु हिन्दीभाषायां सप्तमीविभक्तिरेव भवति (हरि की पूजा में लीन।)

**अकारक–व्यत्यासः (Non–Karaka Divergence)**

कारकेतरविभक्तयः उपपदविभक्तयः सम्बन्धद्योतिकाः विभक्तयः भवन्ति। ताः आधारीकृत्य यः व्यत्यासः सः अकारक–व्यत्यासः। यथा 'प्रति' एतस्य यदा कर्मप्रवचीयसंज्ञा भवति तदा तत्र पञ्चमीविभक्तिरुपयुज्यते (प्रद्युम्नः कृष्णात् प्रति अस्ति)। परन्तु हिन्दीभाषायां तत्र सम्बन्धद्योतिका षष्ठीविभक्तिरेव भवति (प्रद्युम्न कृष्ण का प्रतिनिधि है।)

**क्रियास्वरूप–व्यत्यासः (Verbal Divergence)**

क्रियामाधारीकृत्य व्यत्यासः भवति। यथा संस्कृतभाषायाम् 'आ+रुह" धातोः यः कर्म तत्र द्वितीयाविभक्तिर्भवति (वानरः वृक्षम् आरोहति।) परन्तु हिन्दीभाषायां 'चढ' इति धातुः अकर्मकः धातुः अतः आधारत्वेन विवक्षितत्वात् सप्तमीविभक्तिर्भवति (बन्दर पेड पर चढता है।)।

**क्रियामूल–व्यत्यासः (Complex–Predicate Divergence)**

संस्कृतभाषायां यत्र क्रिया एका भवति परन्तु हिन्दीभाषायां तस्याः परिवर्तनं क्रियामूलरूपेण भवति। यथा संस्कृतभाषायां 'अनु+सृ' इति धातोः यत् कर्म तत्र द्वितीया विभक्तिर्वर्तते (सीता रामम् अनुसरति।) परन्तु अयं धातुः यदा हिन्दीभाषायां 'अनुसरण कर' इति रूपेण परिवर्त्यते तदा तत्र कर्मणि षष्ठीविभक्तिः आगच्छति (सीता राम का अनुसरण करती है।)।

इदानीं व्यत्यासानां सविस्तरं विवरणं प्रस्तूयते

**वैकल्पिक–व्यत्यासः (Optional Divergence)**

संस्कृतभाषायां वैकल्पिकरूपेण विभक्तिद्वे प्राप्येते। परन्तु हिन्दीभाषायां सः विकल्पः न भवति। अत एव विकल्पकारणात् अयं व्यत्यासः वैकल्पिक–व्यत्यासः कथ्यते।

**विवरणम्**

**दिवः कर्म च (साधकतमम्, कारके) 1.4.43**

दिव्–धातोः साधकतममं यत् कारकं तत् कर्मसंज्ञं भवति, चकारात् करणसंज्ञं च।

संस्कृतम् *अक्षैः* दीव्यति।

*अक्षान्* दीव्यति।

हिन्दी *पासों से* खेलताहै।

उपर्युक्तोदाहरणे 'अक्ष' इति दिव् धातोः करणम् अतः करणत्वात् 'कर्तृकरणयोस्तृतीया' (पा० 2.3.18) इत्यनेन सूत्रेण तृतीया विभक्तिः भवति। परन्तु 'दिवः कर्म च' (1.4.43) इदं सूत्रं करणं विकल्पयति, येन करणस्य पक्षे कर्मसंज्ञा अपि भवति। हिन्दीभाषायां सूत्रमेतत् न प्रवर्तते। अत एव तत्र करणत्वात् तृतीया विभक्तिरेव भवति।

अग्रिमसरण्यां (सरणिः–1) एतेषां सूत्राणां सूची सङ्कलिता अस्ति। यानि सूत्राणि संस्कृतभाषायां वैकल्पिकत्वेन इतरकारकस्य निर्धारणं कुर्वन्ति येनेतरकारकत्वाद्भिन्नविभक्तिः आगच्छति। परन्तु हिन्दीभाषा तत्र मूलकारकम् (संस्कृतभाषायां यस्य विकल्पः भवति) एव अङ्गीकरोति। अतः विभक्तिपरिवर्तनस्यापेक्षा नास्ति।

| क्रमाङ्कः | सूत्रसङ्ख्या | सूत्रम् | उत्सर्गः | | विकल्पः | |
|---|---|---|---|---|---|---|
| | | | कारकम् | विभक्तिः | कारकम् | विभक्तिः |
| 1 | 1.4.43 | दिवः कर्म च | करण | 3 | कर्म | 2 |
| 2 | 1.4.44 | परिक्रयणे सम्प्रदानमन्यतरस्याम् | करण | 3 | सम्प्रदानम् | 4 |
| 3 | 1.4.53 | हृकोरन्यतरस्याम् | कर्ता | 3 | कर्म | 4 |
| 4 | 2.3.12 | गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि | कर्म | 2 | – | 4 |
| 5 | 2.3.22 | संज्ञोऽन्यतरस्याम् कर्मणि | कर्म | 2 | – | 3 |
| 6 | 2.3.31 | एनपा द्वितीया | – | 6 | – | 2 |
| 7 | 2.3.59 | विभाषोपसर्गे | कर्म | 2 | – | 6 |
| 8 | 2.3.71 | कृत्यानां कर्तरि | कर्ता | 3 | – | 6 |

**सरणिः –1 वैकल्पिक–व्यत्यासः**

## आपवादिक-व्यत्यासः (**Exceptional Divergence**)

संस्कृतभाषायां केचन अपवादनियमाः सन्ति ये उत्सर्गविभक्तिं प्रबाध्य इतरविभक्तिनिर्धारणं कुर्वन्ति परन्तु हिन्दीभाषायां स अपवादनियमः न प्रवर्तते। उत्सर्गनियमेन एव विभक्तिनिर्धारणं भवति। संस्कृतभाषायां अपवादः प्रवर्तते हिन्दीभाषायां अपवादस्यास्याभावः भवति। अतः अपवादकारणात् व्यत्यासोऽयं 'आपवादिक-व्यत्यासः' जातः।

**विवरणम्**

**अधिशीङ्स्थासां कर्म (आधारः, कारके)(पा० 1-4-46)**

अधिपूर्वाणां शीङ् स्था आस् इत्येतेषाम् आधारः यः तत् कारकं कर्मसंज्ञं भवति।

संस्कृतम् बालकः *पर्यङ्कम्* अधिशेते।

हिन्दी बालक *पलंग पर* सोता है।

उदाहरणेऽस्मिन् अधि+शीङ् धातोः कर्म 'पर्यङ्क' इत्यस्ति तस्मात् तत्र द्वितीया विभक्तिः। हिन्दीभाषायां सूत्रमिदं न प्रवर्तते। अतः 'पर्यङ्क' इत्यस्य आधारोऽधिकरणम्(पा० 1.4.45) इत्यनेन सूत्रेण अधिकरणसंज्ञा एवञ्च सप्तम्यधिकरणे (पा० 2.3.36) इत्यनेन सूत्रेण तत्र सप्तमी विभक्तिर्भवति। अत्र शीङ् धातोः उदाहरणम् प्रदत्तम् अनेन प्रकारेण अधि+स्था, अधि+आस् इत्यत्रापि ज्ञेयम्।

अग्रिमसरण्यां (सरणिः-2) एतेषां सूत्राणां सूची सङ्कलिता अस्ति। यत्र सामान्यकारकम् प्रबाध्य नूतनकारकस्यारोपः कृतः पाणिनिना। तस्य फलस्वरूपेण तत्र भिन्ना विभक्तिः आगच्छति । परन्तु हिन्दीभाषायां एते नियमाः न प्रवर्तन्ते अतः सामान्यकारकेणैव सामान्यविभक्तिः आगच्छति।

| क्रमाङ्कः | सूत्रसङ्ख्या | सूत्रम् | उत्सर्गः | | अपवादः | |
|---|---|---|---|---|---|---|
| | | | कारकम् | विभक्तिः | कारकम् | विभक्तिः |
| 1 | 1.4.46 | अधिशीङ्स्थासां कर्म | अधिकरणम् | 7 | कर्म | 2 |
| 2 | 1.4.47 | अभिनिविशश्च | अधिकरणम् | 7 | कर्म | 2 |
| 3 | 1.4.48 | उपान्वन्ध्याङ्वसः | अधिकरणम् | 7 | कर्म | 2 |
| 4 | 2.3.58 | दिवस्तदर्थस्य | कर्म | 2 | - | 6 |
| 5 | 2.3.61 | प्रेष्यब्रुवोर्हविषो देवता सम्प्रदानस्य | कर्म | 2 | - | 6 |
| 6 | 2.3.64 | कृत्वोऽर्थप्रयोगे कालेऽधिकरणे | अधिकरणम् | 7 | - | 6 |

**सरणिः - 2 आपवादिक-व्यत्यासः**

## भेदज-व्यत्यासः (**Differential Divergence**)

संस्कृतभाषायां भिन्ना विभक्तिः भवति एवञ्च हिन्दीभाषायां भिन्ना विभक्तिः। अत्र द्वयोः भाषयोः या

विभक्तिर्भवति सा पूर्णरूपेण परस्परभिन्नैव भवति। अतः भेदकारणात् अयं व्यत्यासः 'भेदजव्यत्यासः' इति कथ्यते।

**विवरणम्**

**अपवर्गे तृतीया (कालाध्वनोरत्यन्तसंयोगे)(पा० 2-3-6)**

अपवर्गे गम्यमाने कालाध्वनोरत्यन्तसंयोगे तृतीया विभक्तिर्भवति।

संस्कृतम्　　अह्ना अनुवाकः अधीतः।

हिन्दी　　दिन भर में अनुवाक (वेद का एक भाग) पढ लिया।

उपर्युक्तोदाहरणे अह्ना अनुवाकः अधीतः इत्यस्य तात्पर्यं तेन अध्ययनस्य फलमपि प्राप्तम्। अपवर्गः फलप्राप्तिः, अतः फलप्राप्तिः जाते सति तत्र तृतीया विभक्ति भवति। परन्तु हिन्दीभाषायां एतादृशेषु स्थलेषु नैरन्तर्यं विवक्षितत्वात् तत्र सप्तमीविभक्तिर्भवति।

अग्रिमसरण्यां (सरणिः-3) एतादृशानां सूत्राणां सङ्कलनं कृतम् यत्र संस्कृतभाषायां भिन्ना विभक्तिर्वर्तते एवञ्च हिन्दीभाषायां भिन्ना विभक्तिः।

| क्रमाङ्कः | सूत्रसङ्ख्या | सूत्रम् | संस्कृतम् | | हिन्दी |
|---|---|---|---|---|---|
| | | | कारकम् | विभक्तिः | विभक्तिः |
| 1 | 1.4.34 | श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः | सम्प्रदानम् | 4 | 2,4,6 |
| 2 | 1.4.35 | धारेरुत्तमर्णः | सम्प्रदानम् | 4 | 6 |
| 3 | 1.4.37 | क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः | सम्प्रदानम् | 4 | 4,7 |
| 4 | 1.4.38 | क्रुधद्रुहोरुपसृष्टयोः कर्म | कर्म | 2 | 5,7 |
| 5 | 1.4.39 | राधीक्ष्योर्यस्य विप्रश्नः | सम्प्रदान | 4 | 6 |
| 6 | 2.3.6 | अपवर्गे तृतीया | - | 3 | 7 |
| 7 | 2.3.17 | मन्यकर्मण्यनादरे विभाषाऽप्राणिषु | कर्म | 2,4 | 6 |
| 8 | 2.3.23 | हेतौ | - | 3 | 4 |
| 9 | 2.3..37 | यस्य च भावेन भावलक्षणम् | - | 7 | 6 |
| 10 | 2.3.43 | साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः | - | 7 | 4 |
| 11 | 2.3.67 | क्तस्य च वर्तमाने | - | 6 | 3 |

**सरणिः -3 भेदज-व्यत्यासः**

**अन्यतर-व्यत्यासः (Alternative Divergence)**

संस्कृतभाषायां बहुविभक्तयः प्राप्ताः परन्तु हिन्दीभाषा ततः एकामेव विभक्तिं स्वीकरोति। बहूनाम् एक एव

विभक्तिस्वीकरणार्थं एषः व्यत्यासः "अन्यतरव्यत्यासः" इति संज्ञां प्राप्नोति।

**विवरणम्**

**दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् (पञ्चमी) (पा० 2-3-34)**

दूरार्थः अन्तिकार्थैः=समीपार्थैः शब्दैः योगे षष्ठीविभक्तिः विकल्पेन भवति, पक्षे पञ्चमी च।

संस्कृतम्  ग्रामस्य / ग्रामाद् वनं दूरम् अस्ति।

हिन्दी  गाँव से जंगल दूर है।

उपर्युक्तोदाहरणे संस्कृतभाषायां 'दूर' इति शब्दयोगे 'ग्राम' शब्दात् पञ्चमी एवं षष्ठी इति द्वे विभक्ती आगच्छतः। परन्तु हिन्दीभाषायां पञ्चमीविभक्तिरेव भवति।

अग्रिमसरण्यां (सरणिः-4) एतादृशानां सूत्राणां सङ्कलनं कृतम् यत्र संस्कृतभाषायां नैकाः विभक्तीः भवन्ति परन्तु हिन्दीभाषा तासां विभक्तीनामेका एव विभक्तिः स्वीकरोति।

| क्रमाङ्कः | सूत्रसङ्ख्या | सूत्रम् | संस्कृतम् | हिन्दी |
|---|---|---|---|---|
| | | | विभक्तिः | विभक्तिः |
| 1 | 2.3.32 | पृथग्विनानानाभिस्तृतीयान्यतरस्याम् | 2,3,5 | 5,6 |
| 2 | 2.3.34 | दूरान्तिकार्थेभ्यो द्वितीयान्यतरस्याम् | 5,6 | 5 |
| 3 | 2.3.36 | सप्तम्यधिकरणे च | 2,3,5,7 | 0 |
| 4 | 2.3.39 | स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च | 6,7 | 6 |
| 5 | 2.3.40 | आयुक्तकुशलाभ्यां चासेवायाम् | 6,7 | 7 |
| 6 | 2.3.41 | यतश्च निर्धारणम् | 6,7 | 7 |
| 7 | 2.3.44 | प्रसितोत्सुकाभ्यां तृतीयान्यतरस्याम् | 3,7 | 2,7 |
| 8 | 2.3.72 | तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् | 3,6 | 6 |
| 9 | 2.3.73 | चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः | 4,6 | 2,6 |

**सरणिः -4 अन्यतर-व्यत्यासः**

## अकारक-व्यत्यासः (Non-Karaka Divergence)

केचन शब्दाः भवन्ति, यैः सह अन्यस्य शब्दस्य विभक्तिः प्रभाविता भवति। ताः उपपदविभक्तयः भवन्ति। ताः षष्ठी शेषे (पा० .2.3.50) इत्यस्य अपवादस्वरूपाः सन्ति। एताः सर्वाः कारकेतरः विभक्तयः भवन्ति। एतस्मादस्य व्यत्यास्य 'अकारकव्यत्यासः' इति संज्ञा जाता।

**विवरणम्**

**सहयुक्तेऽप्रधाने (तृतीया) (पा० 2-3-19)**

सहार्थेन युक्तेऽप्रधाने तृतीया विभक्तिः भवति।

संस्कृतम्    सीता रामेण सह वनं गच्छति।

हिन्दी    सीता राम के साथ वन जाती है।

उपर्युक्तोदाहणे संस्कृतभाषायां 'सीता' एवं 'वन' साक्षात् क्रियया सह अन्वेति। अतः तयोः कारकः सम्बन्धः वर्तते, तौ शब्दौ प्रधानौ स्तः। परन्तु रामः साक्षात् क्रियया सह नान्वेति, अतः तस्य कारकत्वन्नास्ति एवं च अप्रधानः शब्दः वर्तते। 'सह' शब्देन 'सीता एवञ्च राम' इत्येतयोः सम्बन्धः। तत्र अप्रधानः 'राम' वर्तते अतः तत्र तृतीयाविभक्तिर्भवति। परन्तु हिन्दीभाषायां 'राम' इति शब्दः 'साथ' इत्यनेन सह सम्बद्धः। तत्र सम्बन्धस्य भावः अतः तत्र षष्ठीविभक्तिर्भवति।

अग्रिमसरण्यां (सरणिः-5) एतादृशानां सूत्राणां सङ्कलनं कृतम। यत्र संस्कृतभाषायाम् कारकेतरसम्बन्धाः सन्ति तदनुगुणं विभक्तिः भवति। तत्र हिन्दीभाषायां षष्ठी एवञ्च अन्यविभक्तयः भवन्ति।

| क्रमाङ्कः | सूत्रसङ्ख्या | सूत्रम् | संस्कृतम् | हिन्दी |
|---|---|---|---|---|
| | | | विभक्तिः | विभक्तिः |
| 1 | 1.4.84 | तृतीयार्थे | 2 | 6 |
| 2 | 1.4.85 | हीने | 2 | 6 |
| 3 | 1.4.87 | उपोऽधिके च | 2 | 6 |
| 4 | 1.4.89 | लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः | 2 | 6 |
| 5 | 1.4.90 | अभिरभागे | 2 | 6 |
| 6 | 1.4.95 | अतिरतिक्रमणे च | 2 | 5,6 |
| 7 | 2.3.4 | अन्तरान्तरेण युक्ते | 2 | 6 |
| 8 | 2.3.5 | कालाध्वनोरत्यन्तसंयोगे | 2 | 7 |
| 9 | 2.3.10 | पञ्चम्यपाङ्परिभिः | 5 | 2 |
| 10 | 2.3.11 | प्रतिप्रतिनिधिप्रतिदाने च यस्मात् | 5 | 6 |
| 11 | 2.3.16 | नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च | 4 | 2,4,6 |
| 12 | 2.3.19 | सहयुक्तेऽप्रधाने | 3 | 6 |
| 13 | 2.3.26 | अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते | 5 | 5,6 |

**सरणिः - 5 अकारक-व्यत्यासः**

## क्रियास्वरूप-व्यत्यासः (**Verbal Divergence**)

एषः क्रियामाधारीकृत्य व्यत्यासः भवति। संस्कृतभाषायां काश्चन क्रियाः एतादृशाः भवन्ति येषां यत् कर्म भवति तद् कर्म हिन्दी भाषायां आधारः भवति। तस्य कारणं हिन्दीभाषायां ताः क्रियाः अकर्मकत्वेन बोधिताः सन्ति। अतः हिन्दीभाषायां तस्य आधारत्वेन विवक्षितत्वात् तत्र सप्तमीविभक्तिर्भवति। वस्तुतः

संस्कृतभाषायां एतादृशः क्रियाबोधकः यः धातुर्वर्तते सः सकर्मकः। परन्तु हिन्दीभाषायां तस्य स्वरूपं परिवर्तितम्। तत्र सः धातुः अकर्मकः जातः। अतः क्रियास्वरूपभेदात् अयं व्यत्यासः 'क्रियास्वरूपव्यत्यासः' कथितः।

**विवरणम्**

संस्कृतम् वानरः वृक्षम् आरोहति।

हिन्दी बन्दर वृक्ष पर चढता है।

उपर्युक्तोदारहणे 'आ+रुह' अयं धातु संस्कृतभाषायां सकर्मकः अत एवात्र 'वृक्ष' इत्यस्य कर्मसंज्ञा भवति तस्य फलं तत्र द्वितीयाविभक्तिः भवति। परन्तु हिन्दीभाषायां 'चढ' इति धातुः अकर्मकः। अतः 'वृक्ष' इत्यस्य आधारत्वेन विवक्षितत्वात् तत्र सप्तमीविभक्तिः भवति। अनेन प्रकारेण ये धातवः संस्कृतभाषायां सकर्मकाः परन्तु हिन्दीभाषां अकर्मकाः तत्र एतादृशः व्यत्यासः दृश्यते।

संस्कृत-हिन्दीभाषयोः क्रियां स्वीकृत्य यदि कर्मकारकस्य भेदाः वर्तन्ते तेषां वर्गीकरणं यान्त्रिकानुवादं साहाय्यं विधास्यति।

## क्रियामूल-व्यत्यासः (**Complex-Predicate Divergence**)

संस्कृतभाषायां यत्र क्रिया एका भवति परन्तु हिन्दीभाषायां तस्याः परिवर्तनं क्रियामूलरूपेण भवति। क्रियामूलरूपेण परिवर्तनेन अयं व्यत्यासः 'क्रियामूलव्यत्यासः' जातः।

**विवरणम्**

संस्कृतम् सीता रामम् अनुसरति।

हिन्दी सीता राम का अनुसरण करती है।

उपर्युक्तोदाहरणे 'अनु+सृ' इति धातोः कर्म 'राम' अस्ति अतः तत्र द्वितीया विभक्तिः। परन्तु हिन्दीभाषायां 'अनुसरण कर' इति धातुः क्रियामूलः धातुः वर्तते अतः क्रियामूलधातुयोगे कर्मणि षष्ठीविभक्तिः भवति। अत्र वस्तुतः 'अनुसरण' इति पदं संस्कृताधारितं कृदन्तं वर्तते। अतः 'कर्तृकर्मणोः कृतिः' (पा० 2.3.65) इत्यनेन षष्ठीविभक्तिः भवति। अयं नियमः हिन्दीभाषायामपि प्रवर्तते।

क्रियामाधारीकृत्य व्यत्यासां विशदरूपेण अध्ययनमपेक्ष्यते। तत्र द्विसहस्रधातुनां कारकाकाङ्क्षा एवं हिन्दीभाषया सह तुलनात्मकमनुशीलमपेक्षते। एतादृशमध्ययनं यान्त्रिकानुवादे अत्यावश्यकं महत्त्वपूर्णञ्च वर्तते।

## उपसंहारः

व्यत्यासप्रकाराणामिदानीमेतेन प्रकारेण उपसंह्रियते –

(अ) व्यत्यासः संस्कृतव्याकरणस्य प्रभावेन अग्रिमसरण्यां स्पष्टीक्रियते

| क्रमाङ्कः | व्यत्यास-प्रकारः | संस्कृतम् | हिन्दी |
|---|---|---|---|
| 1 | वैकल्पिक-व्यत्यासः | वैकल्पिकरूपेण विभक्ती द्वे प्राप्येते। | उत्सर्गतः एकैव विभक्तिः भवति। |
| 2 | आपवादिक-व्यत्यासः | उत्सर्गविभक्तिं प्रबाध्य | उत्सर्गनियमेन एव विभक्तिनिर्धारणं |

| | | | |
|---|---|---|---|
| | | इतरविभक्तिनिर्धारणं कुर्वन्ति। | भवति। |
| 3 | भेदज–व्यत्यासः | भिन्ना विभक्तिः भवति | भिन्ना विभक्तिः भवति। |
| 4 | अन्यतर–व्यत्यासः | संस्कृतभाषायां बहुविभक्तयः प्राप्ताः। | एकामेव विभक्तिं स्वीकरोति। |
| 5 | अकारक–व्यत्यासः | अकारकेषु एकाधिकविभक्तयः भवन्ति। | प्रायः षष्ठीविभक्तिरेव भवति। |
| **सरणिः – 6 उपसंहारः** | | | |

(ब) हिन्दीभाषायाः विशिष्टस्वरूपत्वेन व्यत्यासः अधो लिखितम् वर्तते।

1. क्रियायाः विशेषविभक्तिनिर्धारणम्।
2. क्रियामूलम्

उपर्युक्तविवेचनाधारेण यान्त्रिकानुवादे शब्दानां अर्थनिर्धारणे एका पद्धतिः निर्मिता भवति। एवञ्च संस्कृतभाषायां एवमाधुनिकभारतीयभाषासु विभक्तिस्तरे व्यत्यासानां विवरणं अनया रीत्या प्रतिपादयितुं शक्यते।

## कृतज्ञता–ज्ञापनम्

कार्यमिदं भारतसर्वकारस्य "संस्कृत–सङ्गणक–साधनानि एवं संस्कृत–हिन्दी–यान्त्रिकानुवाद–यन्त्रस्य निर्माणम्" (Development of Sanskrit Computational tools and Sanskrit–Hindi Machine Translation System) इति नाम्नी परियोजनायाः भागं वर्तते। सम्मान्यान् प्रो० रामकृष्णमाचार्यमहाभागान् एवं प्रो० लक्ष्मीबाईमहोदयाः सविनयं कार्तज्ञं विज्ञापयामः। येषां मार्गदर्शनेन कार्योऽयं समाप्तिमगात्।

## सन्दर्भग्रन्थसूची

1. आचार्य रामशास्त्री, 'संस्कृत शिक्षण सरणी', आचार्य रामशास्त्रि ज्ञानपीठ (१९९८)
2. द्विवेदी, कपिल देव: 'भाषा विज्ञान एवं भाषा शास्त्र', विश्वविद्यालय प्रकाशन, वारणसी (२००६)
3. शर्म, राम रंग तथा शर्मा, मालती: 'श्री भट्टोजिदीक्षित विरचित वैयाकरण सिद्धान्तकौमुदी' (कारक प्रकरणम्), भारतीय विद्या प्रकाशन, वारणसी–देहली (१९९७)
4. Cardona, George: 'Panini and Paniniyas on sesa relations', Kunjunni Raja Academy of Indological Research, Kochi (2007)
5. Dorr, Bonnie: 'Classification of Machine Translation Divergence and a Proposed Solution', Computational Linguistics 20(4) (1994)
6. Dave, S., Parikh, J., Bhattacharya, P.: 'Interlingua Based English–Hindi Machine Translation and Language Divergence', Journal of Machine Translation (JMT) 17 (2002)
7. Goyal, Pawan and Sinha, R. Mahesh K.: 'Translation Divergence in English–Sanskrit–Hindi Language Pairs', In Amba Kulkarni, and Gerard Huet, editors, Sanskrit Computational Linguistics, Proceedings of Third

International Symposium, Hyderabad. Springer–Verlag LNAI 5406 (2009)
8. Mishra, Vimal and Mishra, R. B.: 'Study of Example Based English to Sanskrit Machine Translation', Journal of Research and Development in Comp Sc. And Engg Number 37, Jan–June (2008)
9. Sharma, Rama Nath: 'The Astadhyayi of Panini', Vols 1–3, Munshiram Manoharlal, Delhi 2nd Ed (2002)
10. Vasu, Srisa Chandra: 'The Siddhanta Kaumudi of Bhattoji Dikshita', Vol I, Motilal Banarsidass, Delhi (2003)